# Kashisthitam Karkotakakshetrakathanakam

# काशीस्थितं कार्कोटकक्षेत्रकथानकम्

## Document Information

Text title : Kashisthitam Karkotakakshetrakathanakam

File name : kAshIsthitaMkArkoTakakShetrakathAnakam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 11 | 445-458||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# काशीस्थितं कार्कोटकक्षेत्रकथानकम्

- शिवपार्वतीसंवादे -
कार्कोटकश्चकारात्र तपो घोरतरं मुदा ।
सहस्रयुगपर्यन्तं काश्यां पञ्चाग्निमध्यगः ॥ ४३७॥

तत्र कार्कोटकाख्यं च लिङ्गं संस्थापयन्मुदा ।
तल्लिङ्गस्य पुरोभागे कुण्डमेकं ससर्ज च ॥ ४३८॥

यदा घोरं तपस्तप्तं तेन तल्लिङ्गसन्निधौ ।
तदा तल्लिङ्गतः शम्भुराविरासमहं शुभे ॥ ४३९॥

ततः संवीक्ष्य मां नागः प्रणिपत्य पुनः पुनः ।
कृत्वा पूजां यथाशास्त्रं चकार स्तोत्रमादरात् ॥ ४४०॥

ततस्तेनैव नागेन याचितौ च वरोत्तमौ ।
एको महेश्वरे भक्तिर्दृढास्त्विति वरः परः ॥ ४४१॥

अन्यो नभःशुक्लपक्षे पञ्चम्यां ये जना मुदा ।
स्नानं कुर्वन्त्यत्र कुण्डे तेषां रोगादि मास्त्विति ॥ ४४२॥

ततो दत्तं मया तस्मै वरद्वयमनुत्तमम् ।
ततः परमभूत्प्रीत्या तप्तं घोरतरं तपः ॥ ४४३॥

विषदोषादि शान्त्यर्थं तद्दिने सर्वथा जनैः ।
स्नानं कार्यं प्रयत्नेन श्राद्धं च विधिपूर्वकम् ॥ ४४४॥

कार्कोटकुण्डनिकटे सन्ति शैवाः सहस्रशः ।
तैरपि स्वस्वनाम्नैव लिङ्गानि स्थापितानि च ॥ ४४५॥

कार्कोटकस्तपस्त्यक्त्वा शैवैः सह कदाचन ।
स्नानार्थं शिवगङ्गायां गतः शिवपरायणः ॥ ४४६॥

तत्र स्नात्वा यथाशास्त्रमाग्नीध्रेश्वरमव्ययम् ।

सादरं पूजयामास स शैवः शिवतत्परः ॥ ४४७॥

ततः पञ्चाग्निमध्यस्थमूर्ध्वबाहुं जितेन्द्रियम् ।
जटाभसितवीताङ्गं ददर्श स जनार्दनम् ॥ ४४८॥

दृष्ट्वा प्रणम्य बहुधा कृताञ्जलिपुटस्ततः ।
उवाच वचनं चारु शिवभक्तिहितावहम् ॥ ४४९॥

किन्नाम सर्वदा सर्वैर्जपनीयं प्रयत्नतः ।
कुत्रस्थातव्यमनिशं कथं ध्येयो महेश्वरः ॥ ४५०॥

काश्मीरादीनि लिङ्गानि सन्ति नानाविधानि च ।
तेषु श्रेष्ठतरं लिङ्गं किमिष्टफलदायकम् ॥ ४५१॥

कुत्र वा देवदेवस्य महादेवस्य सन्निधिः ।
केन रूपेण कर्तव्यं शिवलिङ्गस्य पूजनम् ॥ ४५२॥

इदं सर्वं विशेषेण निश्चित्य वद सादरम् ।
कृपया शिवभक्तानां हिताय शिवपूजकः ॥ ४५३॥

विष्णुरुवाच -
कार्कोटक त्वया पृष्टं सम्यगेव यथोचितम् ।
यथाशास्त्रं यथाज्ञानं यथा वक्ष्ये शृणु प्रिय ॥ ४५४॥

वेदोपगीतो बहुधा यश्च शैवः षडक्षरः ।
स एव सर्वथा जप्यः शिवमन्त्रो मुमुक्षुभिः ॥ ४५५॥

शिवमन्त्रजपासक्ता मुक्ताः पूर्वं मुनीश्वराः ।
न शैवमन्त्रादपरो मन्त्रो मुक्तिप्रदायकः ॥ ४५६॥

शैवं मन्त्रं विहायान्यं मन्त्रं यः समुपासते (?) ।
स मणिं करगं त्यक्त्वा काचार्थं यतते ध्रुवम् ॥ ४५७॥

प्रभावः शैवमन्त्राणां ज्ञायते न मया ध्रुवम् ।
तत्त्वं तु शिवमन्त्राणां जानाति शिव एव हि ॥ ४५८॥

॥ इति शिवरहस्यान्तर्गते काशीस्थितं कार्कोटकक्षेत्रकथानकं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः ११ । ४४५-४५८॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 11 . 445-458..

Notes:
Kārkoṭaka कार्कोटक (the Serpent) worships Śiva शिव at Kāśi काशी, where he has established a Kārkoṭakaliṅga कार्कोटकलिङ्ग. There also is Kārkoṭakakuṇḍa कार्कोटककुण्ड nearby where several other Śaiva शैव spend their time worshiping Śiva शिव. Kārkoṭaka कार्कोटक meets Viṣṇu विष्णु and wishes to know more about worship of Śiva शिव. Viṣṇu विष्णु expresses the merits of Śiva Ṣaḍakṣara Mantra शिव षडक्षर मन्त्र.
Kaśī काशी harbors several ŚivaTīrthaKṣetra शिवतीर्थक्षेत्र that are outlined in ŚivaRahasyam saptāṃśaḥ शिवरहस्यं सप्तांशः.

Proofread by Ruma Dewan

---

*Kashisthitam Karkotakakshetrakathanakam*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*